तावद्वर्षसहस्राणि वसते विष्णुसद्मनि ॥
प्रासादे कृष्णदेवस्य चित्रकर्म्म करोति यः ।
वसते विष्णुलोके तु यावत्तिष्ठन्ति सागराः ॥”
नारसिंहे ।
“यः कुर्य्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकमवाप्नुयात् ॥”
हयशीर्षे ।
“देवागारं करोमीति मनसा यस्तु चिन्तयेत् ।
तस्य कायगतं पापं तदह्ना विप्र ! नश्यति ।
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥
अष्टेष्टकासमायुक्तं यः कुर्य्याद्दैवतं गृहम् ।
न तस्य फलसम्पत्तिर्व्वक्तुं शक्येत केनचित् ॥
अनेनैवानुमेयन्तु फलं प्रासादविस्तरात् ।
मरणञ्च व्रजेन्मर्त्यो यः कृत्वा प्रथमेष्टकाम् ॥
स समाप्तस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥”
विष्णुरहस्ये ।
“बाल्ये च क्रीड़माना ये पांशुभिर्भवनं हरेः ।
वासुदेवस्य कुर्व्वन्ति तेऽपि तल्लोकगामिनः ॥”
आदिपुराणे ।
“लेपनाच्छादनञ्चैव यः करोति पुनर्नरः ।
देवस्यायतनं कृत्वा न भवेत् कीटजं भयम् ॥”
अथ मन्दिरनिर्म्माणकालः । मात्स्ये ।
“चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु हानिं भाद्रपदे तथा ॥
पत्नीनाशश्चाश्वयुगे कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करजं भयम् ।
लाभन्तु बहुशो विद्यादग्निं माघे विनिर्द्दिशेत् ॥
काञ्चनं फाल्गुने पुत्त्रानिति कालबलं स्मृतम् ।
अश्विनी रोहिणी मूलमुत्तरा-त्रयमैन्दवम् ॥
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्जञ्च सर्व्वे वाराः शुभावहाः ॥
वज्रव्याघातशूलानि व्यतीपातातिगण्डके ।
विष्कम्भगण्डपरिघान् वर्ज्य योगेषु कारयेत् ॥
श्वेतमैत्रे च माहेन्द्रे गान्धर्व्वाभिजिदौहिणे ।
तथा वैराजसावित्रे मुहूर्त्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
स्तम्भोच्छ्रादि प्रकर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥”
हयशीर्षे ।
“वास्तुकर्म्म न चारभ्यं वर्षाकाले विजानता ।
कृष्णपक्षे त्रिभागान्ते शुक्लपादौ द्वितीयके ॥
चतुर्थी नवमी वर्ज्ज्या तिथिश्चापि चतुर्द्दशी ।
भौमस्य तु दिनं वर्ज्ज्यं करणं विष्टिसंज्ञितम् ॥
चित्यन्तरीक्षदिव्योत्थैरुत्पातैर्भयपीड़ितम् ।
उपसृष्टं ग्रहैर्भञ्च व्यतिपातहतं तथा ॥
चन्द्रताराऽनुकूले च कार्य्यं कर्म्म विजानता ।
ध्रुवाणि चात्र शस्तानि नैरृतं शक्रदैवतम् ॥
पुष्यं पौष्णञ्च सावित्रं वायव्यं वैष्णवं तथा ।
स्थिरांशे च स्थिरे लग्ने कर्त्तुश्चोपचयात्मके ॥
केन्द्रे सौम्यग्रहो यस्य त्रिकोणे तु सुरोत्तम ! ।
पापश्चोपचयस्थाने तदा कार्य्यं समारभेदिति ॥”

अथ प्रासादस्थानम् । हयशीर्षे ।
“पूर्व्वं देवकुलं वीक्ष्य प्रासादं स्वल्पकन्तथा ।
समं वाप्यधिकं वापि न कर्त्तव्यं विजानता ॥
उभयोर्द्दिगुणां सीमां त्यक्त्वा चोच्छ्रायसंमि-
ताम् ।
प्रासादं कारयेदन्यं नोभयं पीड़येद्बुधः ॥”* ॥
अथ स्थानशोधनानि । देवीपुराणे ।
“देवो विष्णुस्तथा रुद्रो ब्रह्माद्याः सुरसत्तमाः ।
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः ॥
गर्त्तादिलक्षणा धात्री गन्धस्वादेन या भवेत् ।
वर्णेन च सुरश्रेष्ठ ! सा मही सर्व्वकामदा ॥”
मात्स्ये ।
“पूर्व्वं भूमिं परीक्षेत पश्चात् वास्तुं प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ॥
विप्रादेः शस्यते भूमिरतः कार्य्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्त्रियस्य च ॥
कषाये कटुता तद्वद्वैश्यशूद्रेषु शस्यते ।
अरत्निमात्रे वै गर्त्ते स्वनुलिप्ते च सर्व्वतः ॥
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ।
ज्वालयेद्भूपरीक्षार्थं पूर्णं तत् सर्व्वदिङ्मुखम् ॥
दीप्ता पूर्व्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः समृद्धिको नाम दीप्यते सर्व्वतस्तु यः ॥
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ।
अरत्निमात्रकं गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके श्रियमाप्नोति न्यूने हानिं समे समम् ।
फालकृष्टेऽथवा देशे सर्व्वबीजानि रोपयेत् ॥
त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठा मध्या कनिष्ठा भूर्व्वर्ज्जनीयेतरा सदा ॥”
हयशीर्षे ।
“सुरभीणां रतिर्यत्र सवत्सानां वृषैः सह ।
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ! ॥
राज्ञां पूर्व्वं गृहं यत्राश्मनां वज्रिणां तथा ।
काश्मीरचन्दनामोदा कर्पूरागुरुगन्धिनी ॥
कमलोत्पलगन्धा च जातीचम्पकगन्धिनी ।
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ॥
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ।
सुगन्धिव्रीहिगन्धा च शुभदव्यसना च या ॥
सर्व्वेषां वर्णिनां भूमिः सर्व्वसाधारणा मता ।
दुर्गन्धा दुःस्वना या च नानावर्णा च दुर्भगा ॥
वृत्तार्द्धचन्द्रसदृशा विस्ताराद्द्विगुणायता ।
विवर्णा वर्णहीना च वक्रा शुचिमुखी तथा ॥
द्विवर्णा सूर्पसदृशी गोमुखी च त्रिकोणिका ।
वड़्सा शूलसदृशी दन्तिपृष्ठोपमा च या ॥
सरीसृपसमा या च दिङ्मुखा शकटाकृतिः ।
एवं प्रकारा या भूमिर्व्वर्ज्ज्या यत्नेन देशिकैः ॥”
किञ्च ।
“प्रासादस्य विशेषेण प्रोक्ता भूमिश्चतुर्व्विधा ।
सुपद्मा भद्रिका पूर्णा धूम्रा रागिण्यथापरा ॥
तिलकैर्नारिकेलैश्च बर्हिःकाशैश्च शोभिता ।
पद्मेन्दीवरसंयुक्ता सा सुपद्मेति विश्रुता ॥
नदीसमुद्रायतनतीर्थपर्य्यन्तशोभिता ।
पुष्पवृक्षसमाकीर्णा क्षीरवृक्षोपशोभिता ॥

वनोद्यानलतागुल्मफुल्लस्तम्बसमावृता ।
यज्ञीयवृक्षसुक्षेत्रयुक्ता भद्रेति कीर्त्तिता ॥
बकुलाशोकबहुला तथा प्रवाम्रलोहितैः ।
माधवीवेष्टिता या च मुद्गनिष्पावकोद्रवैः ॥
शूकधान्यैश्च पुन्नागैर्गिरिपार्श्वगता च या ।
तोयञ्च स्वल्पकं यस्यां सा पूर्णा परिकीर्त्तिता ॥
बिल्वार्कस्नुहिपीलूनां वनैर्या परितो वृता ।
सशर्करा च कठिना युक्ता कण्टकिभिर्द्रुमैः ॥
गृध्रगोमायुकाकानां श्येनानां या कुलाकुलैः ।
धूम्रेति कीर्त्तिता सा तु तां यत्नात् परिवर्ज्जयेत् ॥
ततो भूमिं परीक्षेत पूर्व्वोदक्प्रवणां शुभाम् ।
असङ्कटां तथाच्छन्नामल्पतोयां परिप्लुताम् ॥
संपूर्य्यमाणे खाते तु तथाधिकमृदं शुभाम् ।
कुसुम्भसदृशं वर्णं यस्यां न म्लानिमृच्छति ॥
न निर्व्वाति तथा दीपस्तोयं शीघ्रं न शीर्य्यते ।
श्वेतारुणा पीतकृष्णा विप्रादीनां प्रशस्यते ॥
आज्यसद्गन्धमद्यानां तुल्यगन्धा तु या भवेत् ।
मधुरा च कषाया च अम्ला च कटुका च या ॥
कुशैः शरैस्तथा काशैः दूर्व्वाभिर्या च संवृता ।
तस्यां पुण्येऽथ नक्षत्रे कुर्य्याद्भूमिपरिग्रहम् ॥”
अथ भूमिपरिग्रहः । तत्रैव ।
“प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ।
मांसं हरिद्राचूर्णञ्च सलाजदधिशक्तवः ॥
एभिर्भूतबलिं दत्त्वा स्वमन्त्राक्षरेण तु ।
पातयित्वा ततः शङ्कूनष्टदिक्षु निवेशयेत् ॥
राक्षसाश्चापि भूताश्च येऽस्मिंस्तिष्ठन्ति भूतले ।
ते सर्व्वे व्यपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥
इत्युच्चाप्य भूतादीन् तां भूमिं परिशोधयेत् ।
आदित्यादिग्रहाणाञ्च लोकपालैः समं कृतौ ॥
अर्घ्यमिष्टविधानेन ततो वै होममाचरेत् ।
चतुर्होमं ततः कुर्य्यान्मूलमन्त्रेण देशिकः ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषडन्तेन देशिकः ।
वृषभौ कपिलौ गृह्य सवर्णौ वा विचक्षणः ।
योजनार्थं हलस्यैव गृह्णीयादसनोद्भवम् ॥
प्राङ्मुखं योज्य मन्त्रज्ञो वस्त्रालङ्कारभूषितः ।
आसनीं यष्टिमादाय द्वादशाक्षरविद्यया ॥
संमर्द्दैन समीकृत्य शुभबीजानि वापयेत् ।
संप्राप्ते शुभकाले तु गोभिस्तत् खादयेद्बुधः ।
पुनस्तं कर्षयित्वा तु समीकृत्य गृहं गुरुः ॥”
मात्स्ये च ।
“हीनाधिकां गतां वास्तोः सर्व्वतः परिवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्व्वत्रैव विवर्ज्जयेत् ॥”* ॥
अथ दिक्साधनम् । हयशीर्षे ।
“बाह्यवास्तु समं कृत्वा चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम् ॥
द्वादशाङ्गुलमानेन नाड़ी वारांस्तु भ्रामयेत् ।
मध्ये सुनिश्चलं शङ्कुं स्थाप्य छायां निरी-
क्षयेत् ॥
प्रवेशे निष्क्रमे तस्यां शङ्कुच्छायां निरूपयेत् ।
वैषुवे विमले व्योम्नि शङ्कुना साधयेद्दिशम् ॥
शरद्वसन्तयोरेवमादित्यात् साधयेद्दिशम् ।
प्राचीं वा पुष्यवेधेन चित्रामन्तरेण वा ॥